**International Journal of Research in Social Sciences**
Vol. 9, Issue 6, June - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# न्यायदर्शने पक्षतास्वरूपम्

**डॉं.ज्योतिप्रकाशनन्दः**

सन्दिग्धसाध्यवान् पक्षः । यत्र साध्यसंशयो भवति, तत्स्थलं 'पक्ष' इति कथ्यते। तत्र पक्षवृत्तिविशेषधर्म एव पक्षता । स विशेषधर्मः वादिनां वाग्वैमत्यात् केषाञ्चिन्मते साध्यसंशयरूपः केषाञ्चिन्मते वा संशययोग्यतारूपः सिद्ध्यभावरूपश्च ।

गङ्गेशोपाध्यायैः 'सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ती'ति[१] पक्षतायाः लक्षणं स्वीकृतम्। साध्यसंशयः पक्षता इत्यत्र पक्षविशेष्यकसाध्यप्रकारकः – साध्याभाव–प्रकारकश्च संशय एवाभिप्रेतो वर्त्तते। स च संशयः यथा समवायसम्बन्धेनात्मवृत्तिस्तथैव विषयतासम्बन्धेन स्वविषयेष्वपि वर्त्तते। एवं प्रकारेण पक्षता प्रकारता, विषयतासम्बन्धेन साध्यरूपप्रकारे साध्याभावरूपप्रकारे च विशेष्यता विषयतासम्बन्धेन विशेष्ये च वर्त्तते। अतो विशेष्यतारूपविषयतासम्बन्धेन साध्यसंशयोऽपि पक्षवृत्तिधर्मो भवितुमर्हति। एवञ्चानुमित्सादिरपि। साध्यसिद्धिर्नाम पक्षविशेष्यकसाध्यप्रकारकनिश्चय एव। तादृशसिद्ध्यभावः पक्षता। यावत्पर्यन्तं सिद्धिः समवायसम्बन्धेनात्मनि न तिष्ठति तावत्पर्यन्तं पक्षे विशेष्यतासम्बन्धेन न तिष्ठति। अतस्सिद्ध्याभावोऽपि पक्षवृत्तिधर्मो विशेष्यतासम्बन्धेन संजातः।

गङ्गेशोपाध्यायस्य मतमनुसृत्य विश्वनाथपञ्चाननेनापि मुक्तावल्यां ''सिषाधयिषा–विरहविशिष्टसिद्ध्यभावः पक्षते''त्युक्तम्। पक्षता यस्मिन्नस्ति स पक्ष इत्यर्थः। तत्साध्य–विशिष्टतत्पक्षविषयकत्वप्रकारिकानुमितिविषयिणीच्छा[२] अनुमितिप्रकारकेच्छा वा सिषाधयिषा। सा च 'पर्वते वह्न्यनुमितिर्जायतामित्याकारिका ।' अत्र विरहशब्दस्याभावार्थ–त्वमर्थः। स च स्वप्रतियोग्यनुमित्साविषयानुमितिविशेष्यतासम्बन्धेन पर्वते वर्त्तते, सामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टासिद्धिः, तच्च 'पर्वतो वह्निमानिति प्रत्यक्षात्मकसाध्यनिश्चयः स्वविशेष्यतासम्बन्धेन पर्वते वर्त्तते।' तादृशपक्षताश्रयः पक्ष इत्यर्थः। यत्र सिद्धिः सिषाधयिषा च, तत्र विशेषणाभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादनुमितिर्भवति। यत्र केवलं सिषाधयिषा, तत्रोभयाभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादनुमितिर्भवति। किन्तु यत्र केवलं परामर्शो विद्यते तत्र विशेष्याभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादनुमितिर्भवति। 'सिषाधयिषाविरह–विशिष्टसिद्ध्यभावः' इत्यत्र विशेषणं सिषाधयिषाविरहः, विशेष्यञ्च सिद्धिरिति।

प्राचीनानां मते सिषाधयिषामात्रं पक्षता, न तु सिषाधयिषाविरहसहकृत सिद्ध्यभावः। यतो मुमुक्षोः श्रुतिविशेषादात्मनीतरभेदनिश्चयेऽपि मननात्मकानुमितीच्छाया 'इतरभेदवत्तया आत्मनो मननं जायतामित्याकारिकया आत्मा इतरभिन्न' इति पुनः पुनरनुमितिर्जायते, तस्मात्सिषाधयिषा एव पक्षता। अत एवोच्यते – प्रत्यक्षपरिकल्पित–मप्यर्थमनुमानेन वुभुत्सन्ते तर्करसिकाः इत्युक्तिरपि सङ्गच्छते इति तेषामाशयः। तत्र तन्मतं दूषयितुं वदन्ति अर्वाचीनाः – न च सिषाधयिषामात्रं पक्षताया लक्षणम्, तस्य घनगर्जनादेः व्यतिरेकव्यभिचरितत्वात्। अर्थात् पर्वतो वह्निमान् इत्यादिस्थले लक्षणसङ्गतावपि गगनं मेघवद् घनगर्जनादित्यादावव्याप्तिः। अत्र हि सिषाधयिषाया अभावेऽपि

**International Journal of Research in Social Sciences**
Vol. 9, Issue 6, June - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

गृहाभ्यन्तरस्थस्य पुरुषस्य मेघगर्जनतो मेघानुमितेरप्रतिहतत्वम्, कारणाभावेऽपि कार्यसत्तात्मकव्यतिरेक-व्यभिचारात् ।

अत एव साध्यसंदेहोऽपि न पक्षता विनापि सिषाधयिषां घनगर्जनेन मेघानुमानात्[३] ।

न चानुमितिजनिकेच्छैव पक्षता, स च क्वचिदात्मनीव, सर्वत्रैश्वरनिष्ठैव तस्याः तदानीं सत्त्वान्नोक्तव्यभिचार इति वाच्यम्। अनुमितिजनिकेच्छाया नित्यत्वेन सर्वदा पक्षताप्रसङ्गात् सिद्धिकालेऽप्यनुमित्यापत्तेः।

न तु साध्यसंशयः पक्षता। यत्र साध्यनिश्चयोऽस्ति तत्रानुमितेरनुत्पत्तिरिति साध्यनिश्चयकाले अनुमितिवारणाय साध्यसंशयरूपपक्षता अनुमितेरङ्गमिति प्राचीन-मताभिप्रायेण पक्षता इति बोध्यम्। साध्यनिश्चयसत्त्वे साध्याभावनिश्चयसत्त्वे वा अनुमितेरनुत्पादात्, साध्यनिश्चयस्य साध्याभावनिश्चयस्य वा संशयप्रतिबन्धकत्वात् संशयाभावे अनुमित्यभावात् संशयसत्त्वे चानुमितेः सत्त्वात्। साध्यसंशयस्तत्र 'वह्निः पर्वते न वा', 'वह्निनिष्ठाभावप्रतियोगी न वेत्यादिसंशयसाधारणः' 'पक्षधर्मिकसाध्यवत्ता-निश्चयप्रतिबध्यः संशयः' पक्षता। प्राचीनैः समानविषयकत्वेन प्रतिबन्धकता स्वीकृतत्वात्। तथा च साध्यवत्तानिश्चयप्रतिबन्ध्यत्वे सति स्वनिष्ठविषयताघटितधर्मावच्छिन्नप्रतिबन्धक-तानिरूपितप्रतिबन्ध्यत्वं पक्षतासामान्यलक्षणमिति वदन्ति ।

साध्यसन्देहमात्रमपि न पक्षता । साध्यसन्देहोऽपि इत्यत्र पक्षधर्मिकसाध्यवत्ता-निश्चयप्रतिबध्यः संशयः 'पर्वतो वह्निमान्नवे'त्यादिरूपोऽपि न पक्षता। अत्र व्यतिरेक-व्यभिचारः। व्यतिरेकव्यभिचारोनाम कारणाभावे कार्यसत्त्वम्। यथा 'गगनं मेघवत्-घनगर्जनादि'त्यत्र 'गगनं मेघवन्न वे'त्यादि संशयाभावेऽपि गृहाभ्यन्तरस्थितस्य पुरुषस्य घनगर्जनेन लिङ्गानुमित्युत्पत्तेः कारणाभावेऽपि कार्यसत्त्वात्मकव्यतिरेकव्यभिचारादित्यर्थः।

सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव, अतः सिषाधयिषाविरह-विशिष्टत्वं सिद्धौ विशेषणम्। इन्द्रियजन्यं पर्वतो वह्निमानिति प्रत्यक्षज्ञानमिति सिद्धिः। तस्याः पर्वते विशेष्यताख्यविषयतासम्बन्धेन सत्त्वेऽपि, तदनन्तरं पर्वते वह्न्यनुमितिर्मे जायतामितीच्छात्मकसिषाधयिषा यत्र जाता, तत्र ''सिद्ध्यभाव एव यदि पक्षता, सिद्धिश्च प्रतिबन्धिका'' तदा प्रत्यक्षात्मकसिद्धेः सत्त्वादनुमितिर्न स्यात्, किन्तु भवत्येव, तथा च कारणाभावेऽपि कार्यसत्त्वात्मकव्यतिरेकव्यभिचारापत्तिः। तद्वारणाय सिद्धौ सिषाधयि-षाविरहविशिष्टत्वं विशेषणं देयम्। तथा च सिषाधयिषाविरहविशिष्टमनुमितिप्रतिबन्धिका, अत्र च पर्वते सिषाधयिषासत्त्वात् तदभावे देशान्तरे पर्वतादौ, तत्र च या 'पर्वतो वह्निमानि'ति काचित् सिद्धिः सैव देशान्तरीया सिषाधयिषाविरहविशिष्टा भवति, सा अत्र पर्वते नास्ति किन्तु तदभावस्य सत्त्वात् पक्षतासत्त्वेनानुमित्युत्पत्तौ व्यतिरेकव्यभिचाराऽभावादित्यर्थः।

तदित्थं विशिष्टाभावस्य त्रैविध्यात् पक्षताऽपि त्रिविधा भवति – विशेषणाभावप्रयुक्ता, विशेष्याभावप्रयुक्ता क्वचिदुभयाभावप्रयुक्तेति। यत्र सिषाधयिषासिद्धिश्चोभे तत्र सिषाधयि-षाविरहरूपविशेषणाभावाद् विशेषणाभावप्रयुक्तो विशिष्टाभावः, यत्र च सिषाधयिषा न वर्त्तते सिद्धिश्च नास्ति तत्र सिषाधयिषाविरहरूपविशेषणसत्त्वेऽपि सिद्धिरूपविशेष्याभावाद् विशेष्याभावप्रयुक्तो विशिष्टाभावः, यत्र तु सिषाधयिषाऽस्ति सिद्धिस्तु न तत्र सिषाधयि-षाविरहरूपविशेषणसिद्धिरूपविशेष्योभयभावाद् विशेषणविशेष्येभयभावप्रयुक्तविशिष्टा-भावेति। यत्र पक्षे 'पर्वतो वह्निमानि'ति सिद्धिर्वर्तते । तत्र 'पर्वते वह्न्यनुमितिर्जायता-मित्याकारिका सिषाधयिषा यदि नास्ति तदा देशान्तरीयकालान्तरीयसिषाधयिषाविरह-विशिष्टासिद्धिः प्रतिबन्धिका वर्तते तत्र न पक्षता तत्र विशेष्यविशेषणोभद्सत्त्वात्।' सिषाधयिषाविरहवैशिष्ट्यं च सिद्धौ एककालावच्छेदेन एकशरीरावच्छेदेनैकात्मवृत्तित्वम्,

तेन सिषाधयिषाकालीनासिद्धेः कालिकसम्बन्धेन सिषाधयिषाविरहविशिष्टत्वेन, घटावच्छेदेनैकस्मिन्नात्मनि सिषाधयिषाविरहविशिष्टत्वेन, वा नानुमितिहानिः, एककालीनैकशरीरावच्छेदेन एकात्मवृत्तित्वस्याऽभावादिति। परामर्शात्मककारणसत्त्वे सिद्ध्यात्मकप्रतिबन्धकसत्त्वे यदि सिषाधयिषा स्यात्, तदेव सिषाधयिषा उत्तेजकत्वं भवेत्। नत्वेवं भवति, नह्यात्मनो विशेषगुणा इच्छाज्ञानादयो युगपद्भवन्ति, अतः 'सिषाधयिषा-विरहे'ति विशेषणं व्यर्थमिति चेत् ? उच्यते – यदि सिषाधयिषाविरहेतिविशेषणस्योपादानं न क्रियते एवं सिद्धिमात्रस्य प्रतिबन्धकत्वं स्वीक्रियते तदा अनुमितीष्टसाधनताविषयके वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्यादौ इष्टाऽप्यनुमितिर्न स्यात्, तत्र तथाविधायाः सिद्धेः सत्त्वात्। एतादृशस्थलेऽनुमितिस्तु निर्विवादैव। न चात्र केवलः सिद्ध्यभावो येनानुमितिरुद्भवेत्, किन्तु सिद्ध्यात्मकपरामर्शस्य विद्यमानता विशेषणग्रहणे तु सिषधयि-षाविरहविशिष्टसिद्ध्यभावरूपा पक्षता निराबाधेति । अतो हि तद्विषणमावश्यकं तथा सति सिषाधयिषाविरहविशिष्टा सिद्धिरेव प्रतिबन्धिका न सिद्धिमात्रं न च सिषाधयिषा सहकृता सिद्धिः प्रतिबन्धिकेति भावो फलितः।

यत्र सिद्धिः परामर्शश्च तत्र यत्किञ्चिज्ज्ञानं मे जायतामित्याकारेकेच्छायामपीच्छा-विरहविशिष्टसिद्ध्यभावेनानुमितिर्भवेदेवेति चेन्न, यादृशसिषाधयिषासत्त्वे सिद्धिसत्वे यद्धेतुकानुमितिः प्रामाणिकी तादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तद्धेतुकानुमितौ पक्षतेति न तु यस्याः कस्याः अपीच्छायाः पक्षतालक्षणसङ्गतम् । सिषाधयिषाया आकारस्तु एतत्पक्षकैतत्साध्यकैताद्धेतुकानुमितिर्मे जायतामित्येव । अत्रानुमितित्वं प्रकारः सिषाधयिषा च तत्प्रकारिकैव। अतः वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इति प्रत्यक्षसत्त्वे प्रत्यक्षादिकं ज्ञानं मे जायतामिति[४] प्रत्यक्षातिरिक्तत्वप्रकारकसिषाधयिषा तल्लिङ्गकानुमितौ साधिकेति धूमलिङ्गकपरामर्शालोकलिङ्गकसिषाधयिषयोः सत्त्वे तु नानुमितिरिति।

अत एव 'पर्वते'ऽवश्यमुमितीच्छाया अभावकाले पर्वतत्वावच्छिन्नविशेष्यताक वह्नित्वावच्छिन्नप्रकारताकनिश्चयत्वावच्छिन्नज्ञानसत्त्वे, 'पर्वतोवह्निमानि'त्यनुमितिर्न भवति। तादृशं पर्वतात्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालि-निश्चयत्वावच्छिन्नज्ञानं पृथक् पृथगेव तत्तदनुमितौ प्रतिबन्धकं वक्तव्यम्। अर्थात् पर्वततत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नं प्रति पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकानुमितीच्छाविरहकालीनस्य पर्वतत्वावच्छिन्नविशेष्यता-निरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नस्य प्रतिबन्धकत्वं न त्वन्य-प्रकारताकस्यान्यविशेष्यताकस्य वेति । अतः 'पर्वतो वह्निमानि'त्यनुमितेः पूर्वं 'पर्वतस्तेजस्वी'ति अथवा पाषाणमयो वह्निमानिति ज्ञानस्य सिद्ध्यात्मकस्य सत्त्वेऽपि तेन ज्ञानेन सह 'पर्वतो वह्निमानित्यनुमितेः न विरोधः, तत्रैकत्र तेजस्त्वेन प्रकारकत्वात्, अन्यत्र च पाषाणमयत्वेन विशेष्यकत्वात् च । अतोऽत्र सिषाधयिषासत्त्वे अनुमितिर्भवति। परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तद् पक्षतावच्छेदकावच्छेदे अनुमितिर्दृश्यते[५] । यतः पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यनिर्णयः प्रतिबन्धकः । न तु पक्षतावच्छेदकसामानाधिकरण्येन। यदा समस्तपर्वते वह्निरनुमातव्यस्तदा समस्तपर्वतवृत्तिर्वह्निनिश्चयः प्रतिबन्धकः, न तु यत्किञ्चित्पर्वत-वृत्तिनिश्चयः । तथा प्राचीनानां मते-पक्षतावच्छेदकपर्वतत्वावच्छिन्ननिखिलपर्वतनिष्ठविशेष्यतानिरूपितसंयोगसंसर्गकवह्नित्वा-

वच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नं प्रति पक्षतावच्छेदकपर्वतत्वावच्छिन्ननिखिलपर्वत-निष्ठविशेष्यतानिरूपितसंयोगसंसर्गक–वह्नित्वावच्छिन्नप्रकारताशालिनिश्चयः प्रतिबन्धकः। तत्र नव्यमते च पक्षतावच्छेदकपर्वतत्वावच्छिन्नविशेष्यतानिरूपितपक्षतावच्छेदकव्यापकत्वविशिष्ट-संयोगपर्याप्तसांसर्गिकविषयतानिरूपितसाध्यतावच्छेदकवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितपर्वतत्वव्यापकत्वविशिष्टसंयोगपर्याप्तसांसर्गिक-विषयतानिरूपितसाध्यतावच्छेदकवह्नित्वावच्छिन्नप्रकारताशालिनिर्णयः प्रतिबन्धक[६] इति।

वस्तुतः पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु पक्षतावच्छेदकाव–च्छेदेनसिद्धिः पक्षतावच्छेदकसामानाधिकरण्येन च सिद्धिः प्रतिबन्धिकेत्यर्थः। तत्र प्रायीनानां मते पर्वतत्वावच्छिन्नयत्किञ्चित्पर्वतान्यन्यावृत्तिविशेष्यतानिरूपितसंयोग–संसर्गकवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नपर्वतनिष्ठ–विशेष्यतानिरूपितसंयोगसंसर्गकवह्नित्वावच्छिन्नप्रकारताशालिनिर्णयः प्रतिबन्धकः। नव्य मते पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगपर्याप्तसांसर्गिकविषयतानिरूपितवह्नित्वाव–च्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नं प्रति पर्वततत्वावच्छिन्नविशेष्यतानिरूपित–संयोगनिष्ठसांसर्गिकविषयतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिर्णयः प्रतिबन्धक इति।

अत्र यज्ञपत्युपाध्यादीनां मते सिषाधयिषाविरहविशिष्टसिद्ध्यभावः अथवा प्रत्यक्षकारणसामग्री अथवा एतद्वयोर्मन्ध्ये कस्यचिदेकस्याभावः पक्षता[७] । अत एव सिद्धिकाले समानविषयकप्रत्यक्षसामग्रीकाले चानुमितिर्न भवतीतिमतं दूषयितुं स्वसिद्धान्त– मुपस्थापितं ग्रन्थे। यत्र 'अयं पुरुषो न वे'ति संशयोत्तर 'पुरुषत्वव्याप्यकरचरणादिमानयमिति ज्ञानं जायते।' तत्रानुमित्सायामसत्यामपि न त्वनुमितिः। यत्र पुरुषत्वव्याप्यकरादिमानय–मित्याकारिकपरामर्शात्मकविशेषज्ञानं भवति तत्रानुमित्साभावेऽपि पुरुषप्रत्यक्षं जायते नत्वनुमितिरिति। अतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासावत् पक्षताकुक्षौ निवेशं विनैव स्वातन्त्रेण प्रतिबन्धिका भवति [८]। आशयश्चात्र कामिनीजिज्ञासा यथा स्त्रीकामिनः पुरुषस्य सकलज्ञानप्रतिबन्धिका भवति, यथा च मणिमन्त्रादयः स्वातन्त्रेण प्रतिबन्धिका भवन्ति तथा अनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री अनुमित्सायाः स्वातन्त्रेण प्रतिबन्धिका भवति ।

अपि च 'वह्निव्याप्यधूमवान् पर्वतः' इत्याकारकपरामर्शज्ञानानन्तरं विना प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयक–प्रत्यक्षे प्रतिबन्धिका । यदि तु प्रत्यक्षेच्छा वर्त्तते तदा विभिन्नविषयकप्रत्यक्षं जायते इति प्रत्यक्षेच्छाया उत्तेजकत्वम्। तथा च तत्र प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री विभिन्नविषयकप्रत्यक्षे प्रतिबन्धिकेति[९]।

**पादटिप्पणी**

१. त. चि., अनुमा. ।

२. त. चि., दीधि. अनुमा.

३. न्या. सि., मुक्ता.

४. वह्निव्याप्यधूमवान् पर्वतो वह्निमानितिप्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां तु भवत्येव। न्या. सि. मुक्ता., पृ. २५०

५. परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्। न्या. सि. मुक्ता., पृ. २५२

६. न्या. सि. मुक्ता. किरणा., पृ. २५२

७. 'उपाध्यायस्तु सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता ।' दिनकरी

८. यथा 'कामिनीजिज्ञासा ज्ञानमात्रे विरोधिनी' तथा अनुमित्साविरहविशिष्टप्रत्यक्षसामग्री अनुमितौ विरोधिनीति भावः। मुक्तावली, मयूख

९. न्यायसिद्धान्तमुक्तावली, मयूख

**सहायकग्रन्था :**

१. *कारिकावली* – श्रीविश्वनाथन्यायपञ्चाननः, वाराणसी : चौखम्बाकृष्णदास अकादमी, पु. मु., वि. सं. २०५९

२. *तर्कसंग्रहः* – अन्नंभट्टः, संपा. – रा. गो. शुक्ल, दिल्ली : भारतीयविद्याप्रकाशन, २००२

३. *तर्कामृतम्* – जगदीशतर्कालङ्कारः, संपा. – पीयूषकान्तदीक्षितः, दिल्ली : नागपब्लिशर्स, जबाहरनगरम्, २००३

४. *तत्त्वचिन्तामणिः* – गङ्गेशोपाध्यायः, ब्रजजीवनप्राच्यभारतीग्रन्थमाला, चौखम्बा–संस्कृतप्रतिष्ठानम्, १९९०

५. *न्यायकोशः* – भीमाचार्यः, पुना : भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९७८

**International Journal of Research in Social Sciences**
Vol. 9, Issue 6, June - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

६. *न्यायसिद्धान्तमुक्तावली* (किरणावलीसमन्विता)– विश्वनाथपञ्चाननः, व्याख्या, पं. श्रीकृष्णवल्लभाचार्यः, वाराणसी : चौखम्बासंस्कृतसंस्थानम्, १९९०

७. *न्यायसूत्रम्* – महर्षिगौतमः, वाराणसी : काशिसंस्कृतग्रन्थमाला ४३, १९७०

८. *प्रशस्तपादभाष्यम्* (न्यायकन्दलीसहितम्) – प्रशस्तपादाचार्यः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९७७